एते शाक्ता जगद्धात्रि न मनुष्याः कदाचन ॥
पश्यन्ति मानुषान् लोके केवलं कर्म्मचक्षुषा ।
ब्राह्मणैः क्षत्त्रियैर्व्वैश्यैः शूद्रैरेव च जातिभिः ॥
वाममार्गप्रभावेण कर्त्तव्यं जपपूजनम् ।
ये शाक्ता ब्राह्मणा देवि क्षत्त्रिया ब्राह्मणाः स्मृताः ॥
वैश्याश्च ब्राह्मणा देवि सर्व्वे शूद्राश्च ब्राह्मणाः ।
ब्राह्मणाः शङ्कराश्चापि त्रिनेत्राश्चन्द्रशेखराः ॥"
इति मुण्डमालातन्त्रे २।३।४।७ पटलाः ॥ * ॥
"शाक्ता एव द्विजाः सर्व्वे न शैवा न च वैष्णवाः ।
उपासन्ते यतो देवीं गायत्त्रीं परमाक्षरीम् ॥"
इति निर्व्वाणतन्त्रे ३ पटलः ॥
शक्त्युपासनानन्तरमन्योपासननिषेधो यथा,—
"अस्याश्चाराधनं कृत्वा नान्यस्याराधनं चरेत् ।
अन्यस्य स्मरणाद्देवि योगिनीशापमालभेत् ॥"
इति गन्धर्व्वतन्त्रे २ पटलः ॥ * ॥
तस्य आभ्यन्तरस्नानं यथा,—
"शाक्तमाभ्यन्तरस्नानमुक्तं श्रीपञ्चमीमते ।
स्नानप्रकारो द्विविधो बाह्याभ्यन्तरभेदतः ॥
आन्तरं स्नानमत्यन्तं रहस्यमपि सादरात् ।
कथयामि भयध्वस्त्यै चतुर्व्वर्गफलाप्तये ॥
स्वचित्त्रयमनुस्मृत्य चराचरमथ्यतः ।
सवस्त्रं सच्चिदानन्दप्रभावं भावगोचरम् ॥
विमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम् ।
तेन स्नापितमात्मानं भावयेत् भयशान्तये ॥"
इति विश्वसारतन्त्रे २ पटलः ॥ * ॥
तस्य कुशविशेषो यथा,—
"तर्ज्जन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया ।
एष एव कुशः शाक्ते न दर्भो वनसम्भवः ॥"
इति श्यामारहस्यम् ॥
(शक्तिमान् । यथा, ऋग्वेदे । ७ । १०३ । ५ ।
"वाचं शाक्तस्येव वदति शिक्षमाणः ॥"
"शिक्षमाणः शिक्ष्यमाणः शिष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथा अनुवदति तद्वत् ।" इति तद्भाष्ये सायणः ॥ )

शाक्तीकः, पुं, (शक्तिः प्रहरणमस्य । शक्ति + "शक्तियष्ट्योरीकक् ।" ४।४।५९। इति ईकक् ।) शक्तिधारकः । तत्पर्य्यायः । शाक्तिहेतिकः २ । इत्यमरः ॥

शाक्तः, त्रि, शक्त्युपासकः । इति शक्तिशब्दात् अण्प्रत्ययेन निष्पन्नमेतत् ॥

शाक्यः, पुं, (शकोऽभिधानमस्येति । शक + "शण्डिकादिभ्यो ञ्यः ।" ४।३।९२ । इति ञ्यः ।) बुद्धः । इति हलायुधः ॥

शाक्यमुनिः, पुं, शाक्यवंशावतीर्णबुद्धमुनिविशेषः । इत्यमरः ॥ अस्य सप्त पर्य्याया गौतमशब्दे द्रष्टव्याः । पर्य्यायान्तरं यथा । खजित् २ श्वेतकेतुः ३ धर्म्मकेतुः ४ महामुनिः ५ पञ्चज्ञानः ६ सर्व्वदर्शी ७ महाबोधिः ८ महाबलः ९ बहुक्षमः १० निर्म्मितिः ११ सिद्धार्थः १२ शकः १३ । इति शब्दरत्नावली ॥ शाक्यवंशत्वात् शाक्यः शाक्यश्चासौ मुनिश्चेति शाक्यमुनिः । तथा हि शाको वृक्षविशेषः तत्र भवा विद्यमानाः शाक्याः । पितुः शापेन केचिदिक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे शाकवृक्षे कृतवासाश्च शाक्या उच्यन्ते । तदुक्तम् ।
"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे ।
तस्मादिक्ष्वाकुवंश्यास्ते भुवि शाक्या इतिस्मृताः ॥"
इत्यमरटीकायां भरतः ॥

शाक्यसिंहः, पुं, (शाक्यः सिंह इव ।) शाक्यमुनिः । इत्यमरः ॥

शाक्री, स्त्री, दुर्गा । यथा,—
"इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा ।
वज्राङ्कुशकरा देवी वज्रा तेनोपगीयते ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ॥
शक्रपत्नी च ॥

शाख, ऋ व्याप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अशशाखत् । इति दुर्गादासः ॥

शाखः, पुं, कृत्तिकापुत्त्रः । यथा,—
"अवाप चानिलात् पुत्त्रमग्नितुल्यगुणं पुनः ।
अग्निपुत्त्रः कुमारस्तु शरस्तम्बे व्यजायत ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ।
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः ॥"
इति मात्स्ये ५ अध्यायः ॥
क्षितिः । इति शब्दचन्द्रिका ॥

शाखा, स्त्री, (शाखति गगनं व्याप्नोतीति । शाख + अच् । टाप् ।) वृक्षाङ्गविशेषः । डाल इति भाषा । (यथा, दुर्गापूजापद्धतौ ।
"शाखाच्छेदोद्भवं दुःखं न च कार्य्यं त्वया प्रभो ! ॥")
तत्पर्य्यायः । लता २ । इत्यमरः ॥ शाला ३ । इति जटाधरः । शिखा ४ । इति भरतधृतमेदिनी ॥ पक्षान्तरम् । बाहुः । वेदभागः । इति मेदिनी ॥ (यथा, मनौ । ३ । १४५ ।
"यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् ॥")
ग्रन्थभेदः । इति धरणिः ॥ अन्तिकः । इति विश्वः ॥ (प्रकारः । यथा, गीतायाम् ।२।४१।
"बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥")

शाखाकण्टः, पुं, (शाखायां कण्टो यस्य ।) स्नुहीवृक्षः । इति राजनिर्घण्टः ॥

शाखानगरं, क्ली, (शाखेव नगरम् ।) मूलनगरादन्यत् पुरम् । इत्यमरः ॥ (यथा, महाभारते । १२ । ८७ । ८ ।
"शाखानगरमर्हस्तु सहस्रपतिरुत्तमः ॥")
मूलनगरेऽसम्मितस्य जनौघस्य स्थानाय मूलनगरस्य समीपेऽङ्के वा यदन्यत् पुरं नगरान्तरं क्रियते तत् शाखानगरं मूलनगरस्य तरुस्थानीयस्य शाखेव । अभिष्यन्दि रमणमप्यत्र । स्यादभिष्यन्दि रमणं शाखानगरमित्यपि । इति त्रिकाण्डशेषः । इति तट्टीकायां भरतः ॥ अपि च । यथा, शब्दरत्नावल्याम् ।
"आरभ्य मूलनगरादपरं नगरं हि यत् ।
तदभिष्यन्दि रमणं शाखानगरमित्यपि ॥"

शाखापित्तः, पुं, पाणिपादांशमूलदाहः । इति राजनिर्घण्टः ॥

शाखापुरं, क्ली, (पुरस्य शाखा अभिधानात् पूर्व्वनिपातः । शाखेव पुरमिति वा ।) शाखानगरम् । तत्पर्य्यायः । उपपुरम् २ । इति हेमचन्द्रः ॥

शाखाम्ला, स्त्री, (शाखायामम्लो यस्याः ।) वृक्षाम्ला । इति राजनिर्घण्टः ॥

शाखामृगः, पुं, (शाखाया मृगः ।) वानरः । इत्यमरः ॥ (यथा,—
"मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमलक्षणाय ।
का नीतिरीतिरियती रघुवंशवीर !
शाखामृगे जरति यस्तव बाणमोक्षः ॥"
इत्युद्भटः ॥

शाखारण्डः, पुं, स्वशाखां परित्यज्य शाखान्तराध्ययनकर्त्ता । तत्पर्य्यायः । अन्यशाखकः २ । इति हेमचन्द्रः ॥

शाखारथ्या, स्त्री, षोडशहस्तप्रस्थपथः । यथा,—
"धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराण्युपरथ्यकाः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणनामाध्यायः ॥

शाखालः, पुं, (शाखां लाति आश्रयतीति । ला + कः ।) वानीरवृक्षः । इति राजनिर्घण्टः ॥

शाखाशिफा, स्त्री, (शाखायाः शिफा ।) वटादीनां शाखासम्बन्धिशिफा । नामृना इति ख्याता । तरोर्म्मूलादारभ्य अग्रं यावत् गता लतागुडूच्यादिः । इति भरतः ॥ तत्पर्य्यायः । अवरोहः २ । इत्यमरः ॥

शाखी, [न्] पुं, (शाखास्त्यस्येति । शाखा + इनिः ।) वृक्षः । इत्यमरः ॥ (यथा,—
"सीताया हृदि यच्छिरीषकुसुमप्राये पफालोत्कैः
पौलस्त्यस्य नितान्तकुण्ठकुलिशे वक्षाधिके वक्षसि ।
आपुङ्खं निममज्ज मन्मथशरस्तत्रैव जानीमहे
कः शाखी सखि ! यस्य पुष्पमभवत् पुष्पायुधस्यायुधम् ॥"
इत्युद्भटः ॥)
वेदः । तुरुष्काख्यजनः । इति मेदिनी ॥ राजभेदः । इति हेमचन्द्रः ॥

शाखोटः, पुं, वृक्षविशेषः । स्याओड़ा इति भाषा ॥ तत्पर्य्यायः । पिशाचद्रुः २ पीतफलः ३ कर्कशच्छदः ४ । इति त्रिकाण्डशेषः ॥ भूतवृक्षः ५ सकटः ६ अक्षधरः ७ । इति भूरिप्रयोगः ॥ गवाक्षी ८ घूकावासः ९ रूक्षपत्रः १० पीतः ११ केशिक्वोजः १२ घोरनाशनः १३ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । पित्तकारित्वम् । वातहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"शाखोटः पीतफलको भूतावासः खरच्छदः ।